# Shri Sheshachandrikacharya Stotram

# श्रीशेषचन्द्रिकाचार्यस्तोत्रम्

## Document Information

Text title : Shri Sheshachandrikacharya Stotram

File name : sheShachandrikAchAryastotram.itx

Category : deities_misc, gurudev

Location : doc_deities_misc

Author : vidyAratnAkaratIrtha

Transliterated by : Krishnananda Achar

Proofread by : Krishnananda Achar

Description/comments : PanchayatistutiH

Acknowledge-Permission: C Narayanarao

Latest update : June 15, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 15, 2020

*sanskritdocuments.org*

# श्रीशेषचन्द्रिकाचार्यस्तोत्रम्

श्रीपूर्णबोधसमयाम्बुधिचन्दिराय
    विज्ञानभक्तिमुखसद्गुणमन्दिराय ।
हृन्नीरजान्तरवभासितसेन्दिराय
    कुर्वे नमांसि रघुनाथयतीश्वराय ॥ १॥

गोपालपाद सरसीरुहसक्तचित्तम् ।
    द्वैपायनार्यसमयेनिशमप्रमत्तम् ।
पापाद्रिभेदकुलशायितभव्यवृत्तं
    भूपारिजातमनिशं स्मरशुद्धहृत्तम् ॥ २॥

लक्ष्मीनारायणाख्यव्रतिवरकरकञ्जात जातस्वधीत
    प्राज्ञप्रज्ञागमौघक्षितिसुरनिकराराधिताङ्घ्रब्जयुग्मः ।
सह्यक्ष्माभृद्दुहित्रास्फटिककपिललोः सङ्गमे जातवेदो
    मूर्धन्ये राजमानो वहतु मयि कृपां स्वीयदासानुदासे ॥ ३॥

वन्दमानजनसंसदपेक्ष्यं सादयाम्यहमिति स्थिरदीक्षम् ।
संसदि क्षणविदूतविपक्षं कंसभित्सुगुणसाधन दक्षम् ॥ ४॥

व्यासराजयतिवर्यमुखोद्यचन्द्रिकोर्वरितपूर्तिकृतं तम् ।
भावयामि सुरभूमिरुहञ्ज्ञामागतं क्षितिनु(सु)रार्थनयाहम् ॥ ५॥

घोरहृत्तिमिर सन्ततिसूर्यं धीरशेखरमपातकचर्यम् ।
नोनवीषि यदि मस्करिवर्यं भूसुरव्रजसि संसदि शौर्यम् ॥ ६॥

रेत्युक्त्वा लभते रघूद्वहकृपाङ्गत्येदुक्त्वाक्षणात्
    स्यादेवैष घुधातुवाच्यकृतिमान् नाशब्दितोनाथवान्ग् ।
थस्योच्चारणतो लभेत तपसः सिद्धिं यदाख्याक्षरैः
सर्व।ं चैतदवाप्नुतेकिमुत तन्नाम्नेखिलस्योक्तितः ॥ ७॥

रुक्मिणीशचरणाम्बुजसेवासादितानितरलभ्यविभूते ।

व्यासराजयतिशेखर विद्याविष्ठरेश करुणां मयि कुर्याः ॥ ८॥

पदवाक्यप्रमाणां भोनिधि पारीणताभृते ।
सर्वतन्त्रस्वतन्त्राय प्रणमामि मुहूर्मुहुः ॥ ९॥

श्रीशेषचन्द्रिकाचार्य पदपङ्कजसंस्कृतिः ।
अतिशेते देवगवी चिन्तामणि सुरद्रुमान् ॥ १०॥

रघुनाथ यतीशानः पातु मां शरणागतम् ।
शरणागतवात्सल्यमात्मीयं दर्शयन्मयि ॥ ११॥

सर्वोत्तमो हरिरशेष जगन्नमिथ्या
भेदश्च जीवनिकरोनुचरोचितस्य ।
नीचोच्चतास्य च मिथोनिजमोद लाभो-
मुक्तिस्सभक्तितः उरुक्रमणेखिलेशे ॥ १२॥

अक्षादित्रितयं प्रमाणमखिलाम्नायैकवेद्यो हरिः
वृत्तिर्मुख्यतमा यतोस्यकमलानाथे स्वतन्त्रो हरिः ।
सर्वं चैतदधीनमित्यपि दृढं संसाधयित्वाखिळं
दुर्वादं समखण्डयत्सदसि यो मेदां दिशेत्सोमलाम् ॥ १३॥

कण्ठे श्रीतुळसीस्रजं हृदि ददच्छ्रीवल्लभं कर्णयो-
र्द्वन्दे श्रीतुळसीदळे करसरोजातद्वये पुस्तकम् ।
मुद्रोल्लासितमूर्ध्वपुण्ड्रनिकरं काये दधानोन्तिक
भ्राजद्दण्डकमण्डलुर्गुरुवरः श्रेयोर्थिभिश्चिन्त्यतां ॥ १४॥

रघुनाथयतीश तावकीनाखिललक्ष्माण्यनुसन्दधन्निजानि ।
हरतेकुमतिर्यः आर्यवर्यद्रुहि तस्मिन्ननुकुलतांल न युयुः ॥ १५॥

व्यासराजमठोस्माकं मठ एवेति वादिनम् ।
शिक्षस्वगुरुवर्याशु यद्यस्त्यात्ममठे कृपा ॥ १६॥

रघुनाथ यतीशानस्त्वदीयान्स्मरकारुण्यदृशो विधेहि पात्रम् ।
गणयेर्भवदीयदासदासेष्टितयाचेर चिताञ्जलिः प्रणम्य ॥ १७॥

विद्यारत्नाकरोक्तां गुरुवरनुतिमादरेण यः पठति ।
तस्मिन्नामगिरीशो नरहरिरचितः प्रसीददति क्षिप्रम् ॥ १८॥

इति श्रीविद्यारत्नाकरतीर्थविरचितं

श्रीशेषचन्द्रिकाचार्यस्तोत्रं सम्पूर्णम् ।

Encoded and proofread by Krishnananda Achar

*Shri Sheshachandrikacharya Stotram*
pdf was typeset on June 15, 2020

Please send corrections to *sanskrit@cheerful.com*